# Tripuratapini Upanishad

# ત્રિપુરાતાપિન્યુપનિષત્

## Document Information

Text title : Tripuratapini Ypanishad

File name : trip-tapi.itx

Category : upanishhat, svara

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 80 / 108; Atharva Veda - Shakta upanishad

Latest update : August 26, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

Tripuratapini Upanishad

# ત્રિપુરાતાપિન્યુપનિષત્

ત્રિપુરાતાપિનીવિદ્યાવેદ્યચિચ્છક્તિવિગ્રહમ્ ।
વસ્તુતશ્ચિન્માત્રરૂપં પરં તત્ત્વં ભજામ્યહમ્ ॥

ૐ ભદ્રં કર્ણેભિઃ શ્ૃણુયામ દેવાઃ ॥ ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ॥

સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાँ સસ્તનૂભિઃ ॥ વ્યશેમ દેવહિતં યદાયુઃ ॥

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ ॥ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ॥

સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ ॥ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ ॥ અથૈતસ્મિન્નન્તરે ભગવાન્પ્રાજાપત્યં વૈષ્ણવં વિલયકારણં રૂપમાશ્રિત્ય ત્રિપુરાભિધા ભગવતીત્યેવમાદિશક્ત્યા ભૂર્ભુવઃ સ્વસ્ત્રીણિ સ્વર્ગભૂપાતાલાનિ ત્રિપુરાણિ હરમાયાત્મકેન હીઙ્કારેણ હૃલ્લેખાખ્યા ભગવતી ત્રિકૂટાવસાને નિલયે વિલયે ધામ્નિ મહસા ઘોરેણ પ્રાપ્નોતિ । સૈવેયં ભગવતી ત્રિપુરેતિ વ્યાપઠ્યતે । તત્સવિતુર્વરેણ્યં ભર્ગો દેવસ્ય ધીમહિ । ધિયો યો નઃ પ્રચોદયાત્ પરો રજસે સાવદોમ્ । જાતવેદસે સુનવામ સોમમરાતીયતો નિદહાતિ વેદ । સ નઃ પર્ષદતિ દુર્ગાણિ વિશ્વા નાવેવ સિન્ધું દુરિતાત્યગ્નિઃ । ત્ર્યમ્બકં યજામહે સુગન્ધિં પુષ્ટિવર્ધનમ્ । ઉર્વારુકમિવ બન્ધના-ન્મૃત્યોર્મુક્ષીય મામૃતાત્ । શતાક્ષરી પરમા વિદ્યા ત્રયીમયી સાષ્ટાર્ણા ત્રિપુરા પરમેશ્વરી । આદ્યાનિ ચત્વારિ પદાનિ પરબ્રહ્મવિકાસીનિ । દ્વિતીયાનિ શક્ત્યાખ્યાનિ । તૃતીયાનિ શૈવાનિ । તત્ર લોકા વેદાઃ શાસ્ત્રાણિ પુરાણાનિ ધર્માણિ વૈ ચિકિત્સિતાનિ જ્યોતીંષિ શિવશક્તિયોગાદિત્યેવં ઘટના વ્યાપઠ્યતે । અથૈતસ્ય પરં ગહ્વરં વ્યાખ્યાસ્યામો મહામનુસમુદ્ભવં તદિતિ । બ્રહ્મ શાશ્વતમ્ । પરો ભગવાન્નિર્લક્ષણો નિરઞ્જનો નિરુપાધિરાધિરહિતો દેવઃ । ઉન્મીલતે પશ્યતિ વિકાસતે ચૈતન્યભાવં કામયત ઇતિ । સ એકો દેવઃ શિવરૂપી દૃશ્યત્વેન વિકાસતે યતિષુ યજ્ઞેષુ યોગિષુ કામયતે ।

કામં જાયતે સ એષ નિરઞ્જનોઽકામત્વેનોજ્જૃમ્ભતે ।
અકચટતપયશાન્સૃજતે । તસ્માદીશ્વરઃ કામોઽભિધીયતે ।
તત્પરિભાષયા કામઃ કકારં વ્યાપ્નોતિ । કામ એવેદં
તત્તદિતિ કકારો ગૃહ્યતે । ભસ્માત્તત્પદાર્થ ઇતિ ય એવં વેદ ।
સવિતુર્વરેણ્યમિતિ ષૂઙ્ પ્રાણિપ્રસવે સવિતા પ્રાણિનઃ સૂતે
પ્રસૂતે શક્તિમ્ । સૂતે ત્રિપુરા શક્તિરાદ્યેયં ત્રિપુરા
પરમેશ્વરી મહાકુણ્ડલિની દેવી । જાતવેદસમણ્ડલં યોઽધીતે
સર્વં વ્યાપ્યતે । ત્રિકોણશક્તિરેકારેણ મહાભાગેન પ્રસૂતે ।
તસ્માદેકાર એવ ગૃહ્યતે । વરેણ્યં શ્રેષ્ઠં ભજનીયમક્ષરં
નમસ્કાર્યમ્ । તસ્માદ્વરેણ્યમેકારાક્ષરં ગૃહ્યત ઇતિ
ય એવં વેદ । ભર્ગો દેવસ્ય ધીમહીત્યેવં વ્યાખ્યાસ્યામઃ ।
ધકારો ધારણા । ધિયૈવ ધાર્યતે ભગવાન્પરમેશ્વરઃ ।
ભર્ગો દેવો મધ્યવર્તિ તુરીયમક્ષરં સાક્ષાત્તુરીયં સર્વં
સર્વાન્તર્ભૂતમ્ । તુરીયાક્ષરમીકારં પદાનાં
મધ્યવર્તીત્યેવં વ્યાખ્યાતં ભર્ગોરૂપં વ્યાચક્ષતે ।
તસ્માદ્ભર્ગો દેવસ્ય ધીમહીત્યેવમીકારાક્ષરં ગૃહ્યતે ।
મહીત્યસ્ય વ્યાખ્યાનં મહત્ત્વં જડત્વં કાઠિન્યં વિદ્યતે
યસ્મિન્નક્ષતેરેતન્મહિ લકારઃ પરં ધામ । કાઠિન્યાઢ્યં
સસાગરં સપર્વતં સ સપ્તદ્વીપં સકાનનમુજ્જ્વલદ્રૂપં
મણ્ડલમેવોક્તં લકારેણ ।
પૃથ્વી દેવી મહીત્યનેન વ્યાચક્ષતે । ધિયો યો નઃ પ્રચોદયાત્ ।
પરમાત્મા સદાશિવ આદિભૂતઃ પરઃ । સ્થાણુભૂતેન લકારેણ
જ્યોતિર્લિઙ્ગમાત્માનં ધિયો બુદ્ધયઃ પરે વસ્તુનિ ધ્યાનેચ્છારહિતં
નિર્વિકલ્પકે પ્રચોદયાત્પ્રેરયેદિત્યુચ્ચારણરહિતં ચેતસૈવ
ચિન્તયિત્વા ભાવયેદિતિ । પરો રજસે સાવદોમિતિ તદવસાને પરં
જ્યોતિરમલં હૃદિ દૈવતં ચૈતન્યં ચિલ્લિઙ્ગં હૃદયાગારવાસિની
હૃલ્લેખેત્યાદિના સ્પષ્ટં વાગ્ભવકૂટં પઞ્ચાક્ષરં
પઞ્ચભૂતજનકં પઞ્ચકલામયં વ્યાપઠ્યત ઇતિ । ય એવં વેદ ।
અથ તુ પરં કામકલાભૂતં કામકૂટમાહુઃ । તત્સવિતુર્વરેણ્ય-
મિત્યાદિદ્વાત્રિંશદક્ષરીં પઠિત્વા તદિતિ પરમાત્મા સદાશિવોઽકશરં
વિમલં નિરુપાધિતાદાત્મ્યપ્રતિપાદનેન હકારાક્ષરં શિવરૂપં
નિરક્ષરમક્ષરં વ્યાલિખ્યત ઇતિ । તત્પરાગવ્યાવૃત્તિમાદાય શક્તિં દર્શયતિ ।

તત્સવિતુરિતિ પૂર્વેણાધ્વના સૂર્યાધશ્ચન્દ્રિકાં વ્યાલિખ્ય
મૂલાદિબ્રહ્મરન્ધ્રગં સાક્ષરમદ્વિતીયમાચક્ષત ઇત્યાહ ભગવન્તં
દેવં શિવશક્ત્યાત્મકમેવોદિતમ્ ।
શિવોઽયં પરમં દેવં શક્તિરેષા તુ જીવજા ।
સૂર્યાચન્દ્રમસોર્યોગાદ્ધંસસ્તત્તત્પદમુચ્યતે ॥ ૧॥

તસ્માદુજ્જૃમ્ભતે કામઃ કામાત્કામઃ પરઃ શિવઃ ।
કાર્ણોઽયં કામદેવોઽયં વરેણ્યં ભર્ગ ઉચ્યતે ॥ ૨॥

તત્સવિતુર્વરેણ્યં ભર્ગો દેવઃ ક્ષીરં સેચનીયમક્ષરં
સમધુઘ્નમક્ષરં પરમાત્મજીવાત્મનોર્યોગાત્તદિતિ
સ્પષ્ટમક્ષરં તૃતીયં હ ઇતિ તદેવ સદાશિવ એવ
નિષ્કલ્મષ આદ્યો દેવોઽન્ત્યમક્ષરં વ્યાક્રિયતે ।
પરમં પદં ધીતિ ધારણં વિધતે જડત્વધારણં
મહીતિ લકારઃ શિવાધસ્તાત્તુ લકારાર્થઃ સ્પષ્ટમન્ત્યમક્ષરં
પરમં ચૈતન્યં ધિયો યો નઃ પ્રચોદયાત્પરો રજસે સાવદોમિત્યેવં
કૂટં કામકલાલયં ષડધ્વપરિવર્તકો વૈષ્ણવં પરમં
ધામૈતિ ભગવાંશ્ચૈતસ્માદ્ય એવં વેદ । અથૈતસ્માદપરં
તૃતીયં શક્તિકૂટં પ્રતિપદ્યતે । દ્વાત્રિંશદક્ષર્યા ગાયત્ર્યા
તત્સવિતુર્વરેણ્યં તસ્માદાત્મન આકાશ આકાશાદ્વાયુઃ સ્ફુરતિ
તદધીનં વરેણ્યં સમુદીયમાનં સવિતુર્વા યોગ્યો જીવાત્મપરમાત્મ-
સમુદ્ભવસ્તં પ્રકાશશક્તિરૂપં જીવાક્ષરં સ્પષ્ટમાપદ્યતે ।
ભર્ગો દેવસ્ય ધીત્યનેનાધારરૂપશિવાત્માક્ષરં ગણ્યતે ।
મહીત્યાદિનાશેષં કામ્યં રમણીયં દૃશ્યં શક્તિકૂટં
સ્પષ્ટીકૃતમિતિ । એવં પઞ્ચદશાક્ષરં ત્રૈપુરં યોઽધીતે સ
સર્વાન્કામાનવાપ્નોતિ । સ સર્વાંલ્લોકાઞ્જયતિ । સ સર્વા વાચો વિજૃમ્ભયતિ ।
સ રુદ્રત્વં પ્રાપ્નોતિ । સ વૈષ્ણવં ધામ ભિત્ત્વા પરં બ્રહ્મ પ્રાપ્નોતિ ।
ય એવં વેદ । ઇત્યાદ્યાં વિદ્યામભિધાયૈતસ્યાઃ શક્તિકૂટં
શક્તિશિવાદ્યં લોપામુદ્રેયમ્ ।
દ્વિતીયે ધામનિ પૂર્વેણૈવ મનુના બિન્દુહીના શક્તિભૂતહૃલ્લેખા
ક્રોધમુનિનાધિષ્ઠિતા । તૃતીયે ધામનિ પૂર્વસ્યા એવ વિદ્યાયા
યદ્વાગ્ભવકૂટં તેનૈવ માનવીં ચાન્દ્રીં કૌબેરીં વિદ્યામાચક્ષતે ।
મદનાધઃ શિવં વાગ્ભવમ્ । તદૂર્ધ્વં કામકલામયમ્ ।

શક્ત્યૂર્ધ્વં શક્તિમિતિ માનવી વિદ્યા । ચતુર્થે ધામનિ
શિવશક્ત્યાખ્યમન્યત્તૃતીયં ચેયં ચાન્દ્રી વિદ્યા । પઞ્ચમે ધામનિ
ધ્યેયેયં ચાન્દ્રી કામાધઃ શિવાદ્યકામા । સૈવ કૌબેરિ ષષ્ઠે
ધામનિ વ્યાચક્ષત ઇતિ । ય એવં વેદ । હિત્વેકારં તુરીયસ્વરં સર્વાદૌ
સૂર્યાચન્દ્રમસ્કેન કામેશ્વર્યેવાગસ્ત્યસંજ્ઞા । સપ્તમે ધામનિ
તૃતીયમેતસ્યા એવ પૂર્વોક્તાયાઃ કામાદ્યં દ્વિધાધઃ કં મદનકલાદ્યં
શક્તિબીજં વાગ્ભવાદ્યં તયોરર્ધાવશિરસ્કં કૃત્વા નન્દિવિધેયમ્ ।
અષ્ટમે ધામનિ વાગ્ભવમાગસ્ત્યં વાગર્થકલામયં કામકલાભિધં
સકલમાયાશક્તિઃ પ્રભાકરી વિધેયમ્ । નવમે ધામનિ પુનરાગસ્ત્યં
વાગ્ભવં શક્તિમન્મથશિવશક્તિમન્મથોર્વીમાયાકામકલાલયં
ચન્દ્રસૂર્યાનઙ્ગધૂર્જટિમહિમાલયં તૃતીયં ષણ્મુખીયં વિદ્યા ।
દશમે ધામનિ વિદ્યાપ્રકાશિતયા ભૂય એવાગસ્ત્યવિદ્યાં પઠિત્વા ભૂય
એવેમામન્ત્યમાયાં પરમશિવવિધેયમેકાદશે ધામનિ ભૂય એવાગસ્ત્યં
પઠિત્વા એતસ્યા એવ વાગ્ભવં યદ્ધનજં કામકલાલયં ચ તત્સહજં કૃત્વા
લોપામુદ્રાયાઃ શક્તિકૂટરાજં પઠિત્વા વૈષ્ણવી વિદ્યા દ્વાદશે ધામનિ
વ્યાચક્ષત ઇતિ । ય એવં વેદ ।
તાન્હોવાચ । ભગવાન્સર્વે યૂયં શ્રુત્વા પૂર્વાં કામાખ્યાં
તુરીયરૂપાં તુરીયાતીતાં સર્વોત્કટાં સર્વમન્ત્રાસનગતાં
પીઠોપપીઠદેવતાપરિવૃતાં સકલકલાવ્યાપિનીં દેવતાં સામોદાં
સપરાગાં સહૃદયાં સામૃતાં સકલાં સેન્દ્રિયાં સદોદિતાં
પરાં વિદ્યાં સ્પષ્ટીકૃત્વા હૃદયે નિધાય વિજ્ઞાયાનિલયં
ગમયિત્વા ત્રિકૂટાં ત્રિપુરાં પરમાં માયાં શ્રેષ્ઠાં પરાં
વૈષ્ણવીં સંનિધાય હૃદયકમલકર્ણિકાયાં પરાં ભગવતીં
લક્ષ્મીં માયાં સદોદિતાં મહાવશ્યકરીં મદનોન્માદનકારિણીં
ધનુર્બાણધારિણીં વાગ્વિજૃમ્ભિણીં ચન્દ્રમણ્ડલમધ્યવર્તિનીં
ચન્દ્રકલાં સપ્તદશીં મહાનિત્યોપસ્થિતાં પાશાઙ્કુશમનોજ્ઞ-
પાણિપલ્લવાં સમુદ્યદર્કનિભાં ત્રિનેત્રાં વિચિન્ત્ય દેવીં મહાલક્ષ્મીં
સર્વલક્ષ્મીમયીં સર્વલક્ષણસમ્પન્નાં હૃદયે ચૈતન્યરૂપિણીં
નિરઞ્જનાં ત્રિકૂટાખ્યાં સ્મિતમુખીં સુન્દરીં મહામાયાં
સર્વસુભગાં મહાકુણ્ડલિનીં ત્રિપીઠમધ્યવર્તિનીમકથાદિશ્રીપીઠે
પરાં ભૈરવીં ચિત્કલાં મહાત્રિપુરાં દેવીં ધ્યાયેન્મહાધ્યાન-
યોગેનેયમેવં વેદેતિ મહોપનિષત્ ॥ ઇતિ પ્રથમોપનિષત્ ॥ ૧॥

અથાતો જાતવેદસે સુનવામ સોમમિત્યાદિ પઠિત્વા ત્રૈપુરી વ્યક્તિર્લક્ષ્યતે ।
જાતવેદસ ઇત્યેકર્ચસૂક્તસ્યાદ્યમધ્યમાવસાનેષુ તત્ર સ્થાનેષુ
વિલીનં બીજસાગરરૂપં વ્યાચક્ષ્વેત્યૃષય ઊચુઃ । તાન્હોવાચ
ભગવાઞ્જાતવેદસે સુનવામ સોમં તદત્યગ્રવાણીં વિલોમેન પઠિત્વા
પ્રથમસ્યાદ્યં તદેવં દીર્ઘં દ્વિતીયસ્યાદ્યં સુનવામ સોમમિત્યનેન
કૌલં વામં શ્રેષ્ઠં સોમં મહાસૌભાગ્યમાચક્ષતે । સ
સર્વસમ્પત્તિભૂતં પ્રથમં નિવૃત્તિકારણં દ્વિતીયં સ્થિતિકારણં
તૃતીયં સર્ગકારણમિત્યનેન કરશુદ્ધિં કૃત્વા ત્રિપુરાવિદ્યાં
સ્પષ્ટીકૃત્વા જાતવેદસે સુનવામ સોમમિત્યાદિ પઠિત્વા મહાવિદ્યેશ્વરી-
વિદ્યામાચક્ષતે ત્રિપુરેશ્વરીં જાતવેદસ ઇતિ । જાતે આદ્યક્ષરે માતૃકાયાઃ
શિરસિ બૈન્દવમમૃતરૂપિણીં કુણ્ડલિનીં ત્રિકોણરૂપિણીં ચેતિ વાક્યાર્થઃ ।
એવં પ્રથમસ્યાદ્યં વાગ્ભવમ્ । દ્વિતીયં કામકલાલયમ્ । જાત
ઇત્યનેન પરમાત્મનો જૃમ્ભણમ્ । જાત ઇત્યાદિના પરમાત્મા શિવ ઉચ્યતે ।
જાતમાત્રેણ કામી કામયતે કામમિત્યાદિના પૂર્ણં વ્યાચક્ષતે ।
તદેવ સુનવામ ગોત્રારૂઢં મધ્યવર્તિનામૃતમધ્યેનાર્ણેન
મન્ત્રાર્ણાન્સ્પષ્ટીકૃત્વા । ગોત્રેતિ નામગોત્રાયામિત્યાદિના સ્પષ્ટં
કામકલાલયં શેષં વામમિત્યાદિના । પૂર્વેણાધ્વના વિદ્યેયં
સર્વરક્ષાકરી વ્યાચક્ષતે । એવમેતેન વિદ્યાં ત્રિપુરેશીં સ્પષ્ટીકૃત્વા
જાતવેદસ ઇત્યાદિના જાતો દેવ એક ઈશ્વરઃ પરમો જ્યોતિર્મન્ત્રતો વેતિ તુરીયં
વરં દત્ત્વા બિન્દુપૂર્ણજ્યોતિઃસ્થાનં કૃત્વા પ્રથમસ્યાદ્યં દ્વિતીયં ચ
તૃતીયં ચ સર્વરક્ષાકરીસંબન્ધં કૃત્વા વિદ્યામાત્માસનરૂપિણીં
સ્પષ્ટીકૃત્વા જાતવેદસે સુનવામ સોમમિત્યાદિ પઠિત્વા રક્ષાકરીં
વિદ્યાં સ્મૃત્વાદ્યન્તયોર્ધામ્નોઃ શક્તિશિવરૂપિણીં વિનિયોજ્ય સ ઇતિ
શક્ત્યાત્મકં વર્ણં સોમમિતિ શૈવાત્મકં ધામ જાનીયાત્ । યો જાનીતે
સ સુભગો ભવતિ । એવમેતાં ચક્રાસનગતાં ત્રિપુરવાસિનીં સદોદિતાં
શિવશક્ત્યાત્મિકમવેદિતાં જાતવેદાઃ શિવ ઇતિ સેતિ
શક્ત્યાત્માક્ષરમિતિ શિવાદિશક્ત્યન્તરાલભૂતાં ત્રિકૂટાદિચારિણીં
સૂર્યાચન્દ્રનમસ્કાં મન્ત્રાસનગતાં ત્રિપુરં મહાલક્ષ્મીં
સદોદિતાં સ્પષ્ટીકૃત્વા જાતવેદસે સુનવામ સોમમિત્યાદિ
પઠિત્વા પૂર્વં સદાત્માસનરૂપાં વિદ્યાં સ્મૃત્વા વેદ ઇત્યાદિના
વિશ્વાહસંતતોદયબૈન્દવમુપરિ વિન્યસ્ય સિદ્ધાસનસ્થાં ત્રિપુરાં

માલિનીં વિદ્યાં સ્પષ્ટીકૃત્વા જાતવેદસે સુનવામ સોમમિત્યાદિ
પઠિત્વા ત્રિપુરાં સુન્દરીં શ્રિત્વા કલે અક્ષરે વિચિન્ત્ય મૂર્તિભૂતાં
મૂર્તિરૂપિણીં સર્વવિદ્યેશ્વરીં ત્રિપુરાં વિદ્યાં સ્પષ્ટીકૃત્વા
જાતવેદસ ઇત્યાદિ પઠિત્વા ત્રિપુરાં લક્ષ્મીં શ્રિત્વાગ્નિં નિદહાતિ
સૈવેયમગ્ન્યાનને જ્વલતીતિ વિચિન્ત્ય ત્રિજ્યોતિષમીશ્વરીં ત્રિપુરામમ્બાં
વિદ્યાં સ્પષ્ટીકુર્યાત્ । એવમેતેન સ નઃ પર્ષદતિ દુર્ગાણિ
વિશ્વેત્યાદિપરપ્રકાશિની પ્રત્યગ્ભૂતા કાર્યા । વિદ્યેયમાહ્વાનકર્માણિ
સર્વતો ધીરેતિ વ્યાચક્ષતે । એવમેતદ્વિદ્યાષ્ટકં મહામાયા-
દેવ્યઙ્ગભૂતં વ્યાચક્ષતે । દેવા હ વૈ ભગવન્તમબ્રુવન્મહાચક્રનાયકં
નો બ્રૂહીતિ સાર્વકામિકં સર્વારાધ્યં સર્વરૂપં વિશ્વતોમુખં
મોક્ષદ્વારં યદ્યોગિન ઉપવિશ્ય પરં બ્રહ્મ ભિત્ત્વા નિર્વાણમુપવિશન્તિ ।
તાન્હોવાચ ભગવાઞ્શ્રીચક્રં વ્યાખ્યાસ્યામ ઇતિ । ત્રિકોણં ત્ર્યસ્રં કૃત્વા
તદન્તર્મધ્યવૃત્તમાનયષ્ટિરેખામાકૃષ્ય વિશાલં નીત્વાગ્રતો
યોનિં કૃત્વા પૂર્વયોન્યગ્રરૂપિણીં માનયષ્ટિં કૃત્વા તાં સર્વોર્ધ્વાં
નીત્વા યોનિં કૃત્વાદ્યં ત્રિકોણં ચક્રં ભવતિ । દ્વિતીયમન્તરાલં ભવતિ ।
તૃતીયમષ્ટયોન્યઙ્કિતં ભવતિ । અથાષ્ટારચક્રાદ્યન્તવિદિક્કોણાગ્રતો
રેખાં નીત્વા સાધ્યાદ્યાકર્ષણબદ્ધરેખાં નીત્વેત્યેવમથોર્ધ્વ-
સમ્પુટયોન્યઙ્કિતં કૃત્વા કક્ષાભ્ય ઊર્ધ્વગરેખાચતુષ્ટયં
કૃત્વા યથાક્રમેણ માનયષ્ટિદ્વયેન દશયોન્યઙ્કિતં ચક્રં ભવતિ ।
અનેનૈવ પ્રકારેણ પુનર્દશારચક્રં ભવતિ । મધ્યત્રિકોણાગ્રચતુષ્ટયા-
દ્રેખાચરાગ્રકોણેષુ સંયોજ્ય તદ્દશારાંશતોનીતાં માનયષ્ટિરેખાં
યોજયિત્વા ચતુર્દશારં ચક્રં ભવતિ । તતોઽષ્ટપત્રસંવૃતં ચક્રં ભવતિ ।
ષોડશપત્રસંવૃતં ચક્રં ચતુર્દ્વારં ભવતિ । તતઃ પાર્થિવં ચક્રં
ચતુર્દ્વારં ભવતિ । એવં સૃષ્ટિયોગેન ચક્રં વ્યાખ્યાતમ્ । નવાત્મકં
ચક્રં પ્રાતિલોમ્યેન વા વચ્મિ । પ્રથમં ચક્રં ત્રૈલોક્યમોહનં ભવતિ ।
સાણિમાદ્યષ્ટકં ભવતિ । સમાત્રષ્ટકં ભવતિ । સસર્વસંક્ષોભિણ્યાદિદશકં
ભવતિ । સપ્રકટં ભવતિ । ત્રિપુરયાધિષ્ઠિતં ભવતિ । સસર્વસંક્ષોભિણીમુદ્રયા
જુષ્ટં ભવતિ । દ્વિતીયં સર્વાશાપરિપૂરકં ચક્રં ભવતિ ।
સકામાદ્યાકર્ષિણીષોડશકં ભવતિ । સગુપ્તં ભવતિ । ત્રિપુરેશ્વર્યાધિષ્ઠિતં
ભવતિ । સર્વવિદ્રાવિણીમુદ્રયા જુષ્ટં ભવતિ । તૃતીયં સર્વસંક્ષોભણં ચક્રં ભવતિ । સાનઙ્ગકુસુમાદ્યષ્ટકં ભવતિ ।
સગુપ્તતરં ભવતિ ।
ત્રિપુરસુન્દર્યાધિષ્ઠિતં ભવતિ । સર્વાકર્ષિણીમુદ્રયા જુષ્ટં ભવતિ ।

તુરીયં સર્વસૌભાગ્યદાયકં ચક્રં ભવતિ ।
સસર્વસંક્ષોભિણ્યાદિદ્વિસપ્તકં ભવતિ । સસમ્પ્રદાયં ભવતિ ।
ત્રિપુરવાસિન્યાધિષ્ઠિતં ભવતિ । સસર્વવશંકરિણીમુદ્રયા
જુષ્ટં ભવતિ । તુરીયાન્તં સર્વાર્થસાધકં ચક્રં ભવતિ ।
સસર્વસિદ્ધિપ્રદાદિદશકં ભવતિ । સકલકૌલં ભવતિ ।
ત્રિપુરામહાલક્ષ્મ્યાધિષ્ઠિતં ભવતિ । મહોન્માદિનીમુદ્રયા
જુષ્ટં ભવતિ । ષષ્ઠં સર્વરક્ષાકરં ચક્રં ભવતિ ।
સસર્વજ્ઞત્વાદિદશકં ભવતિ । સનિગર્ભં ભવતિ ।
ત્રિપુરમાલિન્યાધિષ્ઠિતં ભવતિ । મહાઙ્કુશમુદ્રયા જુષ્ટં
ભવતિ । સપ્તમં સર્વરોગહરં ચક્રં ભવતિ । સર્વવશિન્યાદ્યષ્ટકં
ભવતિ । સરહસ્યં ભવતિ । ત્રિપુરસિદ્ધ્યાધિષ્ઠિતં ભવતિ ।
સખેચરીમુદ્રયા જુષ્ટં ભવતિ । અષ્ટમં સર્વસિદ્ધિપ્રદં
ચક્રં ભવતિ । સાયુધચતુષ્ટયં ભવતિ । સપરાપરરહસ્યં
ભવતિ । ત્રિપુરામ્બયાધિષ્ઠિતં ભવતિ । બીજમુદ્રયાધિષ્ઠિતં
ભવતિ । નવમં ચક્રનાયકં સર્વાનન્દમયં ચક્રં ભવતિ ।
સકામેશ્વર્યાદિત્રિકં ભવતિ । સાતિરહસ્યં ભવતિ । મહાત્રિપુર-
સુન્દર્યાધિષ્ઠિતં ભવતિ । યોનિમુદ્રયા જુષ્ટં ભવતિ ।
સંક્રામન્તિ વૈ સર્વાણિ ચ્છન્દાંસિ ચકારાણિ । તદેવ ચક્રં
શ્રીચક્રમ્ । તસ્ય નાભ્યામગ્નિમણ્ડલે સૂર્યાચન્દ્રમસૌ ॥

તત્રોંકારપીઠં પૂજયિત્વા તત્રાક્ષરં બિન્દુરૂપં તદન્તર્ગત-
વ્યોમરૂપિણીં વિદ્યાં પરમાં સ્મૃત્વા મહાત્રિપુરસુન્દરીમાવાહ્ય ।
ક્ષીરેણ સ્નાપિતે દેવિ ચન્દનેન વિલેપિતે । બિલ્વપત્રાર્ચિતે દેવિ દુર્ગેઽહં
શરણં ગતઃ । ઇત્યેકયર્ચા પ્રાર્થ્ય માયાલક્ષ્મી તન્ત્રેણ
પૂજયેદિતિ ભગવાનબ્રવીત્ । એતૈર્મન્ત્રૈર્ભગવતીં યજેત્ । તતો દેવી
પ્રીતા ભવતિ । સ્વાત્માનં દર્શયતિ । તસ્માદ્ય એતૈર્મન્ત્રૈર્યજતિ સ
બ્રહ્મ પશ્યતિ । સ સર્વં પશ્યતિ । સોઽમૃતત્વં ચ ગચ્છતિ ।
ય એવં વેદેતિ મહોપનિષત્ ॥

ઇતિ દ્વિતીયોપનિષત્ ॥ ૨॥

દેવા હ વૈ મુદ્રાઃ સૃજેમેતિ ભગવન્તમબ્રુવન્ ।
તાન્હોવાચ ભગવાનવનિકૃતજાનુમણ્ડલં વિસ્તીર્ય
પદ્માસનં કૃત્વા મુદ્રાઃ સૃજતેતિ । સ સર્વાનાકર્ષયતિ

યો યોનિમુદ્રામધીતે । સ સર્વં વેત્તિ । સ સર્વફલમશ્નુતે ।
સ સર્વાન્ભઞ્જયતિ । સ વિદ્વેષિણં સ્તમ્ભયતિ । મધ્યમે
અનામિકોપરિ વિન્યસ્ય કનિષ્ઠિકાઙ્ગુષ્ઠતોઽધીતે
મુક્તયોસ્તર્જન્યોર્દણ્ડવદધસ્તાદેવંવિધા પ્રથમા સમ્પદ્યતે ।
સૈવ મિલિતમધ્યમા દ્વિતીયા । તૃતીયાઙ્કુશાકૃતિરિતિ ।
પ્રાતિલોમ્યેન પાણી સઙ્ઘર્ષયિત્વાઙ્ગુષ્ઠૌ સાગ્રિમૌ
સમાધાય તુરીયા । પરસ્પરં કનીયસેદં મધ્યમાબદ્ધે
અનામિકે દણ્ડિન્યૌ તર્જન્યાવાલિઙ્ગ્યાવષ્ટભ્ય મધ્યમાનખ-
મિલિતાઙ્ગુષ્ઠૌ પઞ્ચમી । સૈવાગ્રેઽઙ્કુશાકૃતિઃ ષષ્ઠી ।
દક્ષિણશયે વામબાહું કૃત્વાન્યોન્યાનામિકે કનીયસીમધ્યગતે
મધ્યમે તર્જન્યાક્રાન્તે સરલાસ્વઙ્ગુષ્ઠૌ ખેચરી સપ્તમી ।
સર્વોર્ધ્વે સર્વસંહૃતિ સ્વમધ્યમાનામિકાન્તરે કનીયસિ
પાર્શ્વયોસ્તર્જન્યાવઙ્કુશાઢ્યે યુક્તા સાઙ્ગુષ્ઠયોગતોઽન્યોન્યં
સમમઞ્જલિં કૃત્વાષ્ટમી । પરસ્પરમધ્યમાપૃષ્ઠવર્તિન્યાવનામિકે
તર્જન્યાક્રાન્તે સમે મધ્યમે આદાયાઙ્ગુષ્ઠૌ મધ્યવર્તિનૌ
નવમી પ્રતિપદ્યત ઇતિ ।
સૈવેયં કનીયસે સમે અન્તરિતેઽઙ્ગુષ્ઠૌ સમાવન્તરિતૌ
કૃત્વા ત્રિખણ્ડાપદ્યત ઇતિ । પઞ્ચ બાણાઃ પઞ્ચાદ્યા
મુદ્રાઃ સ્પષ્ટાઃ । ક્રોમઙ્કુશા । હસખ્ફ્રેં ખેચરી ।
હંસ્રૌ બીજાષ્ટમી વાગ્ભવાદ્યા નવમી દશમી ચ
સમ્પદ્યત ઇતિ । ય એવં વેદ । અથાતઃ કામકલાભૂતં ચક્રં
વ્યાખ્યાસ્યામો હ્રીં ક્લીમૈં બ્લૂઁ સ્ત્રૌમેતે પઞ્ચ કામાઃ
સર્વચક્રં વ્યાવર્તન્તે । મધ્યમં કામં સર્વાવસાને
સમ્પુટીકૃત્ય બ્લૂઙ્કારેણ સમ્પુટં વ્યાપ્તં કૃત્વા દ્વિરૈન્દવેન
મધ્યવર્તિના સાધ્યં બદ્ધ્વા ભૂર્જપત્રે યજતિ । તચ્ચક્રં
યો વેત્તિ સ સર્વં વેત્તિ । સ સકલઁલ્લોકાનાકર્ષયતિ । સ સર્વં
સ્તમ્ભયતિ । નીલીયુક્તં ચક્રં શત્રૂન્મારયતિ । ગતિં
સ્તમ્ભયતિ । લાક્ષાયુક્તં કૃત્વા સકલલોકં વશીકરોતિ ।
નવલક્ષજપં કૃત્વા રુદ્રત્વં પ્રાપ્નોતિ । માતૃકયા વેષ્ટિતં
કૃત્વા વિજયી ભવતિ । ભગાઙ્કુકુણ્ડં કૃત્વાગ્નિમાધાય પુરુષો
હવિષા હુત્વા યોષિતો વશીકરોતિ । વર્તુલે હુત્વા શ્રિયમતુલં
પ્રાપ્નોતિ । ચતુરસ્રે હુત્વા વૃષ્ટિર્ભવતિ । ત્રિકોણે હુત્વા

શત્રૂન્મારયતિ । ગતિં સ્તમ્ભયતિ । પુષ્પાણિ હુત્વા વિજયી ભવતિ ।
મહારસૈર્હુત્વા પરમાનન્દનિર્ભરો ભવતિ । ગણાનાં ત્વા ગણપતિં
હવામહે કવિં કવીનામુપમશ્રવસ્તમમ્ । જ્યેષ્ઠરાજં
બ્રહ્મણાં બ્રહ્મણસ્પત આ નઃ શ્રુણ્વન્નૂતિભિઃ સીદ સાદનમ્ ।
ઇત્યેવમાદ્યમક્ષરં તદન્ત્યબિન્દુપૂર્ણમિત્યનેનાઙ્ગં સ્પૃશતિ ।
ગં ગણેશાય નમ ઇતિ ગણેશં નમસ્કુર્વીત । ૐ નમો ભગવતે
ભસ્માઙ્ગરાગાયોગ્રતેજસે હનહન દહદહ પચપચ મથમથ
વિધ્વંસયવિધ્વંસય હલભઞ્જન શૂલમૂલે વ્યઞ્જનસિદ્ધિં કુરુકુરુ
સમુદ્રં પૂર્વપ્રતિષ્ઠિઅતં શોષયશોષય સ્તમ્ભયસ્તમ્ભય
પરમન્ત્રપરયન્ત્રપરતન્ત્રપરદૂતપરકટકપરચ્છેદનકર
વિદારયવિદારય ચ્છિન્ધિચ્છિન્ધિ હ્રીં ફટ્ સ્વાહા । અનેન ક્ષેત્રાધ્યક્ષં
પૂજયેદિતિ । કુલકુમારિ વિદ્મહે મન્ત્રકોટિસુધીમહિ । તન્નઃ કૌલિઃ પ્રચોદયાત્ ।
ઇતિ કુમાર્યર્ચનં કૃત્વા યો વૈ સાધકોઽભિલિખતિ સોઽમૃતત્વં ગચ્છતિ ।
સ યશ આપ્નોતિ । સ પરમાયુષ્યમથ વા પરં બ્રહ્મ ભિત્ત્વા તિષ્ઠતિ ।
ય એવં વેદેતિ મહોપનિષત્ ।
ઇતિ તૃતીયોપનિષત્ ॥ ૩॥

દેવા હ વૈ ભગવન્તમબ્રુવન્દેવ ગાયત્રં હૃદયં નો
વ્યાખ્યાતં ત્રૈપુરં સર્વોત્તમમ્ । જાતવેદસસૂક્તેનાખ્યાતં
નસ્ત્રૈપુરાષ્ટકમ્ । યદિષ્ટ્વા મુચ્યતે યોગી જન્મસંસારબન્ધનાત્ ।
અથ મૃત્યુંજયં નો બ્રૂહીત્યેવં બ્રુવતાં સર્વેષાં દેવાનાં
શ્રુત્વેદં વાક્યમથાતસ્ત્ર્યમ્બકેનાનુષ્ટુભેન મૃત્યુંજયં દર્શયતિ ।
કસ્માત્ત્ર્યમ્બકમિતિ । ત્રયાણાં પુરાણામમ્બકં સ્વામિનં તસ્માદુચ્યતે
ત્ર્યમ્બકમિતિ । અથ કસ્માદુચ્યતે યજામહ ઇતિ । યજામહે સેવામહે વસ્તુ
મહેત્યક્ષરદ્વયેન કૂટત્વેનાક્ષરૈકેણ મૃત્યુંજયમિત્યુચ્યતે ।
તસ્માદુચ્યતે યજામહ ઇતિ । અથ કસ્માદુચ્યતે સુગન્ધિમિતિ । સર્વતો યશ
આપ્નોતિ । તસ્માદુચ્યતે સુગન્ધિમિતિ । અથ કસ્માદુચ્યતે પુષ્ટિવર્ધનમિતિ ।
યત્સર્વાંલ્લોકાન્સૃજતિ યત્સર્વાંલ્લોકાંસ્તારયતિ યત્સર્વાંલ્લોકાન્વ્યાપ્નોતિ
તસ્માદુચ્યતે પુષ્ટિવર્ધનમિતિ । અથ કસ્માદુચ્યતે ઉર્વારુકમિવ
બન્ધનાન્મૃત્યોર્મુક્ષીયેતિ । સંલગ્નત્વાદુર્વારુકમિવ મૃત્યોઃ સંસારબન્ધનાત્સંલગ્નત્વાદ્બદ્ધત્વાન્મોક્ષીભવતિ મુક્તો ભવતિ ।
અથ કસ્માદુચ્યતે મામૃતાદિતિ અમૃતત્વં પ્રાપ્નોત્યક્ષરં

પ્રાપ્નોતિ સ્વયં રુદ્રો ભવતિ ।
દેવા હ વૈ ભગવન્તમૂચુઃ સર્વં નો વ્યાખ્યાતમ્ ।
અથ કૈર્મન્ત્રૈઃ સ્તુતા ભગવતી સ્વાત્માનં દર્શયતિ
તાન્સર્વાઞ્છૈવાન્વૈષ્ણવાન્સૌરાન્ગાણેશાન્નો
બ્રૂહીતિ । સ હોવાચ ભગવાંસ્ત્ર્યમ્બકેનાનુષ્ટુભેન
મૃત્યુંજયમુપાસયેત્ । પૂર્વેણાધ્વના વ્યાપ્તમેકાક્ષરમિતિ
સ્મૃતમ્ । ૐ નમઃ શિવાયેતિ યાજુષમન્ત્રોપાસકો
રુદ્રત્વં પ્રાપ્નોતિ । કલ્યાણં પ્રાપ્નોતિ । ય એવં વેદ । તદ્વિષ્ણોઃ
પરમં પદં સદા પશ્યન્તિ સૂરયઃ । દિવીવ ચક્ષુરાતતમ્ ।
વિષ્ણોઃ સર્વતોમુખસ્ય સ્નેહો યથા પલલપિણ્ડમોતપ્રોતમનુવ્યાપ્તં
વ્યતિરિક્તં વ્યાપ્નુત ઇતિ વ્યાપ્નુવતો વિષ્ણોસ્તત્પરમં પદં પરં વ્યોમેતિ
પરમં પદં પશ્યન્તિ વીક્ષન્તે । સૂરયો બ્રહ્માદયો દેવાસ ઇતિ
સદા હૃદય અદધતે । તસ્માદ્વિષ્ણોઃ સ્વરૂપં વસતિ તિષ્ઠતિ
ભૂતેશ્વિતિ વાસુદેવ ઇતિ । ૐ નમ ઇતિ ત્રીણ્યક્ષરાણિ । ભગવત ઇતિ
ચત્વારિ । વાસુદેવાયેતિ પઞ્ચાક્ષરાણિ । એતદ્વૈ વાસુદેવસ્ય
દ્વાદશાર્ણમભ્યેતિ । સોપપ્લવં તરતિ । સ સર્વમાયુરેતિ । વિન્દતે
પ્રાજાપત્યં રાયસ્પોષં ગૌપત્યં ચ તમશ્નુતે પ્રત્યગાનન્દં
બ્રહ્મપુરુષં પ્રણવસ્વરૂપમકાર ઉકારો મકાર ઇતિ । તાનેકધા
સંભવતિ તદોમિતિ । હંસઃ શુચિષદ્વસુરન્તરિક્ષસદ્ધોતા
વેદિષદતિથિર્દુરોણસત્ । નૃષદ્વરસદૃતસદ્વ્યોમસદબ્જા ગોજા
ઋતજા અદ્રિજા ઋતં બૃહત્ । હંસ ઇત્યેતન્મનોરક્ષરદ્વિતીયેન
પ્રભાપુઞ્જેન સૌરેણ ધૃતમબ્જા ગોજા ઋતજા અદ્રિજા ઋતં
સત્યા-પ્રભા-પુઞ્જિ-ન્યુષા-સન્ધ્યા-પ્રજ્ઞાભિઃ
શક્તિભિઃ પૂર્વં સૌરમધીયાનઃ સર્વં ફલમશ્નુતે ।
સ વ્યોમ્નિ પરમે ધામનિ સૌરે નિવસતે ।
ગણાનાં ત્વતિ ત્રૈષ્ટુભેન પૂર્વેણાધ્વના મનુનૈકાર્ણેન
ગણાધિપમભ્યર્ચ્ય ગણેશત્વં પ્રાપ્નોતિ । અથ ગાયત્રી
સાવિત્રી સરસ્વત્યજપા માતૃકા પ્રોક્તા તયા સર્વમિદં વ્યાપ્તમ્ ।
ઐં વાગીશ્વરિ વિદ્મહે ક્લીં કામેશ્વરી ધીમહિ । સૌસ્તન્નઃ શક્તિઃ
પ્રચોદયાદિતિ । ગાયત્રી પ્રાતઃ સાવિત્રી મધ્યન્દિને સરસ્વતી સાયમિતિ
નિરન્તરમજપા । હંસ ઇત્યેવ માતૃકા । પઞ્ચાશદ્વર્ણવિગ્રહેણા-
કારાદિક્ષકારાન્તેન વ્યાપ્તાનિ ભુવનાનિ શાસ્ત્રાણિ

ચ્છન્દાંસીત્યેવં ભગવતીં સર્વં વ્યાપ્નોતીત્યેવ તસ્યૈ વૈ નમોનમ ઇતિ ।
તાન્ભગવાનબ્રવીદેતૈર્મન્ત્રૈર્નિત્યં દેવીં યઃ સ્તૌતિ સ સર્વં પશ્યતિ ।
સોઽમૃતત્વં ચ ગચ્છતિ । ય એવં વેદેત્યુપનિષત્ ॥

ઇતિ તુરીયોપનિષત્ ॥ ૪॥

દેવા હ વૈ ભગવન્તમબ્રુવન્સ્વામિન્નઃ કથિતં સ્ફુટં
ક્રિયાકાણ્ડં સવિષયં ત્રૈપુરમિતિ । અથ પરમનિર્વિશેષં
કથયસ્વેતિ । તાન્હોવાચ ભગવાંસ્તુરીયયા માયયાન્ત્યયા
નિર્દિષ્ટં પરમં બ્રહ્મેતિ । પરમપુરુષં ચિદ્રૂપં
પરમાત્મેતિ । શ્રોતા મન્તા દ્રષ્ટાદેષ્ટા સ્પ્રષ્ટાઘોષ્ટા
વિજ્ઞાતા પ્રજ્ઞાતા સર્વેષાં પુરુષાણામન્તઃપુરુષઃ
સ આત્મા સ વિજ્ઞેય ઇતિ । ન તત્ર લોકા અલોકા ન તત્ર દેવા અદેવાઃ
પશવોઽપશવસ્તાપસો ન તાપસઃ પૌલ્કસો ન પૌલ્કસો
વિપ્રા ન વિપ્રાઃ । સ ઇત્યેકમેવ પરં બ્રહ્મ વિભ્રાજતે નિર્વાણમ્ ।
ન તત્ર દેવા ઋષયઃ પિતર ઈશતે પ્રતિબુદ્ધઃ સર્વવિદ્યેતિ ।
તત્રૈતે શ્લોકા ભવન્તિ ।
અતો નિર્વિષયં નિત્યં મનઃ કાર્યં મુમુક્ષુણા ।
યતો નિર્વિષયો નામ મનસો મુક્તિરિષ્યતે ॥ ૧॥

મનો હિ દ્વિવિધં પ્રોક્તં શુદ્ધં ચાશુદ્ધમેવ ચ ।
અશુદ્ધં કામસંકલ્પં શુદ્ધં કામવિવર્જિતમ્ ॥ ૨॥

મન એવ મનુષ્યાણાં કારણં બન્ધમોક્ષયોઃ ।
બન્ધનં વિષયાસક્તં મુક્ત્યૈ નિર્વિષયં મનઃ ॥ ૩॥

નિરસ્તવિષયાસઙ્ગં સંનિરુધ્ય મનો હૃદિ ।
યદા યાત્યમનીભાવસ્તદા તત્પરમં પદમ્ ॥ ૪॥

તાવદેવ નિરોદ્ધવ્યં યાવધૃદિગતં ક્ષયમ્ ।
એતજ્જ્ઞાનં ચ ધ્યાનં ચ શેષોઽન્યો ગ્રન્થવિસ્તરઃ ॥ ૫॥

નૈવ ચિન્ત્યં ન ચાચિન્ત્યં ન ચિન્ત્યં ચિન્ત્યમેવ ચ ।
પક્ષપાતવિનિર્મુક્તં બ્રહ્મ સમ્પદ્યતે ધ્રુવમ્ ॥ ૬॥

સ્વરેણ સલ્લયેદ્યોગી સ્વરં સંભાવયેત્પરમ્ ।
અસ્વરેણ તુ ભાવેન ન ભાવો ભાવ ઇષ્યતે ॥ ૭॥

તદેવ નિષ્કલં બ્રહ્મ નિર્વિકલ્પં નિરઞ્જનમ્ ।
તદ્બ્રહ્માહમિતિ જ્ઞાત્વા બ્રહ્મ સમ્પદ્યતે ક્રમાત્ ॥ ૮॥

નિર્વિકલ્પમનન્તં ચ હેતુદૃષ્ટાન્તવર્જિતમ્ ।
અપ્રમેયમનાદ્યન્તં યજ્જ્ઞાત્વા મુચ્યતે બુધઃ ॥ ૯॥

ન નિરોધો ન ચોત્પત્તિર્ન બદ્ધો ન ચ સાધકઃ ।
ન મુમુક્ષુર્ન વૈ મુક્ત ઇત્યેષા પરમાર્થતા ॥ ૧૦॥

એક એવાત્મા મન્તવ્યો જાગ્રત્સ્વપ્નસુષુપ્તિષુ ।
સ્થાનત્રયવ્યતીતસ્ય પુનર્જન્મ ન વિદ્યતે ॥ ૧૨॥

એક એવ હિ ભૂતાત્મા ભૂતેભૂતે વ્યવસ્થિતઃ ।
એકધા બહુધા ચૈવ દૃશ્યતે જલચન્દ્રવત્ ॥ ૧૨॥

ઘટસંવૃતમાકાશં નીયમાને ઘટે યથા ।
ઘટો નીયેત નાકાશં તથા જીવો નભોપમઃ ॥ ૧૩॥

ઘટવદ્વિવિધાકારં ભિદ્યમાં પુનઃ પુનઃ ।
તદ્ભેદે ચ ન જાનાતિ સ જાનાતિ ચ નિત્યશઃ ॥ ૧૪॥

શબ્દમાયાવૃતો યાવત્તાવત્તિષ્ઠતિ પુષ્કલે ।
ભિન્ને તમસિ ચૈકત્વમેક એવાનુપશ્યતિ ॥ ૧૫॥

શબ્દાર્ણમપરં બ્રહ્મ તસ્મિન્ક્ષીણે યદક્ષરમ્ ।
તદ્વિદ્વાનક્ષરં ધ્યાયેદ્યદીચ્છેચ્છાન્તિમાત્મનઃ ॥ ૧૬॥

દ્વે બ્રહ્મણી હિ મન્તવ્યે શબ્દબ્રહ્મ પરં ચ યત્ ।
શબ્દબ્રહ્મણિ નિષ્ણાતઃ પરં બ્રહ્માધિગચ્છતિ ॥ ૧૭॥

ગ્રન્થમભ્યસ્ય મેધાવી જ્ઞાનવિજ્ઞાનતત્પરઃ ।
પલાલમિવ ધાન્યાર્થી ત્યજેદ્ગ્રન્થમશેષતઃ ॥ ૧૮॥

ગવામનેકવર્ણાનાં ક્ષીરસ્યાપ્યેકવર્ણતા ।
ક્ષીરવત્પશ્યતિ જ્ઞાની લિઙ્ગિનસ્તુ ગવાં યથા ॥ ૧૯॥

જ્ઞાનનેત્રં સમાધાય સ મહત્પરમં પદમ્ ।
નિષ્કલં નિશ્ચલં શાન્તં બ્રહ્માહમિતિ સંસ્મરેત્ ॥ ૨૦॥

ઇત્યેકં પરબ્રહ્મરૂપં સર્વભૂતાધિવાસં તુરીયં
જાનીતે સોઽક્ષરે પરમે વ્યોમન્યધિવસતિ । ય એતાં વિદ્યાં

તુરીયાં બ્રહ્મયોનિસ્વરૂપાં તામિહાયુષે શરણમહં
પ્રપદ્યે । આકાશાદ્યનુક્રમેણ સર્વેષાં વા એતદ્ભૂતાનામાકાશઃ
પરાયણમ્ । સર્વાણિ હ વા ઇમાનિ ભૂતાન્યાકાશાદેવ જાયન્તે ।
આકાશ એવ લીયન્તે । તસ્માદેવ જાતાનિ જીવન્તિ । તસ્માદાકાશજં
બીજં વિન્દ્યાત્ । તદેવાકાશપીઠં સ્પાર્શનં પીઠં
તેજઃપીઠમમૃતપીઠં રત્નપીઠં જાનીયાત્ । યો જાનીતે
સોઽમૃતત્વં ચ ગચ્છતિ । તસ્માદેતાં તુરીયાં શ્રીકામરાજીયામેકાદશધા
ભિન્નમેકાક્ષરં બ્રહ્મેતિ યો જાનીતે સ તુરીયં પદં પ્રાપ્નોતિ ।
ય એવં વેદેતિ મહોપનિષત્ ॥

ઇતિ પઞ્ચમોપનિષત્ ॥ ૫॥

ૐ ભદ્રં કર્ણેભિઃ શ‍ૃણુયામ દેવાઃ ॥ ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ॥

સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાꣳસસ્તનૂભિઃ ॥ વ્યશેમ દેવહિતં યદાયુઃ ॥

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ ॥ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ॥

સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ ॥ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ હરિઃ ૐ તત્સત્ ॥

॥ ઇતિ શ્રીત્રિપુરાતાપિન્યુપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

---

*Tripuratapini Upanishad*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*